শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামমঙ্গলাশাসনম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরামমঙ্গলাশাসনম্ ॥

শ্রীমন্মার্তাণ্ডৱংশে দশরথনৃপতেরাত্মজৎৱং প্রপন্নঃ
সাকং শেষারিসঙ্গৈর্নিশিচরনিৱহং সংহরিষ্যন্ সুরার্থে।
গুর্ৱাদেশেন হৎৱা পথি রজনিচরীং প্রাপ্য সিদ্ধাশ্রমং যঃ
চক্রে যজ্ঞস্য রক্ষাং স দিশতু ভগৱান্ মঙ্গলং রামচন্দ্রঃ ॥ 1 ॥

রাজ্যং গচ্ছন্ মুনীনামথ পথি ৱিগলচ্ছাপশল্যামহল্যাং
কৃৎৱা ভঙ্কৎৱা ভৱানীরমণভুজসরোজালযং চাপদণ্ডম্।
পাণৌ কৃৎৱাৱনেযীং ভৃগুসুতৱিজযী ভ্রাতৃভিঃ প্রাপ্তদারৈঃ
যোঽৱাৎসীদাত্মপুর্যাং স দিশতু ভগৱান্ মঙ্গলং রামচন্দ্রঃ ॥ 2 ॥

মাতুর্ৱাচা সুমিত্রাতনযজনকজামাত্রমিত্রপ্রৱিষ্টঃ
কান্তারং শান্তচেতাঃ কলশভৱমুনেরাশ্রমং প্রাপ্য ভূযঃ।
প্রীত্যৈ তস্য প্রতিজ্ঞাং নিশিচরকুলনির্মূলনাযাত্তরোষঃ
চক্রে যো ৱিশ্ৱৱীরঃ স দিশতু ভগৱান্ মঙ্গলং রামচন্দ্রঃ ॥ 3 ॥

যস্যা ভ্রাতা দশাস্যো নিশিচরতরুণীং কামুকীং কারযিৎৱা
ভ্রাত্রা তাং কৃত্তনাসাং ঝটিতি খরমুখং রাক্ষসৌঘং চ হৎৱা।
মাযাশক্ত্যেৱ রক্ষোমুষিতজনকজঃ কৢপ্তসুগ্রীৱসখ্যঃ
যো জঘ্নে ৱানরেন্দ্রং স দিশতু ভগৱান্ মঙ্গলং রামচন্দ্রঃ ॥ 4 ॥

নষ্টাং কান্তাং ৱিচেতুং দিশি দিশি চলিতে ৱানরাণাং নিকাযে
শ্রুৎৱা কান্তাপ্রৱৃত্তিং পৱনসুতগিরা প্রাপ্তপাথোধিতীরঃ।
আগ্নেযাস্ত্রানুভাৱক্ষপিতমদভরং দীনদীনং নদীনং
তেনে যো মানশালী স দিশতু ভগৱান্ মঙ্গলং রামচন্দ্রঃ ॥ 5 ॥

মধ্যেপাথোধি বদ্ধ্বাং ঝটিতি গিরিশতৈঃ সেতুমাঢৈক্য লঙ্কাং
হৎৱা সভ্রাতৃমিত্রং রণশিরসি রুষা রাৱণং দারচোরম্।
কান্তাং স্বীকৃত্য শুদ্ধাং জ্ৱলনপতনতঃ প্রাপ্য রম্যামযোধ্যাং
যোঽৱাৎসীদাত্তমোদঃ স দিশতু ভগৱান্ মঙ্গলং রামচন্দ্রঃ ॥ **6** ॥

যো নিত্যং রামচন্দ্রস্তুতিমিতি জপতি ধ্ৱস্তসর্ৱারিসঙ্ঘো
ভুকত্বা ভোগানভীষ্টানভিনৱযশসা পূরযিৎৱা ত্রিলোকীম্।
অন্তে সঞ্চিন্ত্য কান্তাধনতনযগৃহাদ্যেষু রূঢং মমৎৱং
সাক্ষাদালীযতেঽসৌ ভগৱতি ভৱসিন্ধুপ্লৱে চক্রপাণৌ ॥ **7** ॥

শ্রীরাঘৱং দশরথাত্মজমপ্রমেযং
সীতাপতিং রঘুকুলান্ৱযরত্নদীপম্।
আজানুবাহুমরৱিন্দদলাযতাক্ষং
রামং নিশাচরৱিনাশকরং নমামি ॥ **8** ॥

॥ ইতি শ্রীরামমঙ্গলাশাসনং সমাপ্তম্ ॥